योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१२

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १

सर्गः २

सर्गः ३

सर्गः ४

सर्गः ५

सर्गः ६

सर्गः ७

सर्गः ८

सर्गः ९

सर्गः १०

सर्गः ११

सर्गः १२

सर्गः १३

सर्गः १४

सर्गः १५

सर्गः १६

सर्गः १७

सर्गः १८

सर्गः १९

सर्गः २०

सर्गः २१

सर्गः २२

सर्गः २३

सर्गः २४

सर्गः २५

सर्गः ६५

सर्गः ६६

सर्गः ६७

सर्गः ६८

सर्गः ६९

सर्गः ७०

सर्गः ७१

सर्गः ७२

सर्गः ७३

सर्गः ७४

सर्गः ७५

सर्गः ७६

सर्गः ७७

सर्गः ७८

सर्गः ७९

सर्गः ८०

सर्गः ८१

सर्गः ८२

सर्गः ८३

सर्गः ८४

सर्गः ८५

सर्गः ८६

सर्गः ८७

सर्गः ८८

सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२
सर्गः ११६
सर्गः ५३
सर्गः ११७
सर्गः ५४
सर्गः ११८
सर्गः ५५
सर्गः ११९
सर्गः ५६
सर्गः १२०
सर्गः ५७
सर्गः १२१
सर्गः ५८
सर्गः १२२
सर्गः ५९
सर्गः १२३
सर्गः ६०
सर्गः १२४
सर्गः ६१
सर्गः १२५
सर्गः ६२
सर्गः १२६
सर्गः ६३
सर्गः १२७
सर्गः ६४
सर्गः १२८

द्वादशः सर्गः १२

श्रीवसिष्ठ उवाच ।

इति निश्चयवन्तस्ते महान्तो विगतैनसः ।

सत्याः सत्ये पदे शान्ते समे सुखमवस्थिताः ।। १

इति पूर्णधियो धीराः समनीरागचेतसः ।

न निन्दन्ति न नन्दन्ति जीवितं मरणं तथा ।। २

इत्यलक्ष्यचमत्कारा नारायणभुजा इव ।

ऋजवः स्खलिताकारा अपरा इव मेरवः ।। ३

रेमिरे वनखण्डेषु द्वीपेषु नगरेषु च ।

देवोपवनमालासु स्वर्गेषु च सुरा इव ।। ४

भ्रेमुः कुसुमपूर्णासु दोलान्दोलचलासु च ।

विचित्रवनलेखासु मेरुश्रृङ्गशिखासु च ।। ५
चक्रुर्विजितशत्रूणि चामरच्छत्रवन्ति च ।
विचित्रार्थानि राज्यानि चित्राचारमयानि च ।। ६
अनुजग्मुरिमान्सर्वान्नानाचारविचेष्टितान् ।
श्रुतिस्मृत्युदितारम्भामितिकर्तव्यतामिति ।। ७
ईदृशीरमणीयेषु ललनाहास्यहारिषु ।
विहाराहाररम्येषु भोगाभोगेषु भूषिताः ।। ८
विविशुश्चारुचूतासु मन्दारवलितासु च ।
अप्सरोगीतपूर्णासु नन्दनोद्यानभूमिषु ।। ९
सचराचरभूतेषु विश्रान्ताखिलजन्तुषु ।
यज्ञक्रियाकलापेषु गार्हस्थ्येषु यथाक्रमम् ।। १०
तेरुर्हतगजेन्द्रासु भ्रान्तभूरिशिवासु च ।
भेरीभांकारभीमासु संग्रामार्णववीथिषु ।। ११
तस्थुः परुषचित्तासु हृतवित्तोद्धतासु च ।
संरम्भक्षोभरौद्रीषु सर्वासु द्वन्द्वरीतिषु ।। १२
मनस्तेषां तु नीरागमनुपाधि गतभ्रमम् ।
असक्तं मुक्तमाशान्तं परं सत्वपदं गतम् ।। १३
न ममज्जुः क्वचिदपि संकटेषु महत्स्वपि ।
महदप्युपयातेषु कुलशलाः सरस्स्विव ।। १४
नोल्ललास विलासिन्या श्रिया परमकान्तया ।
परिपूर्णेन्दुलक्ष्म्येव जलराशी रघूद्वह ।। १५
न मम्लौ दुःखशोकेन ग्रीष्मेणेव वनस्थलम् ।
जहर्ष च न भोगौघैरवश्यायैरिवौषधीः ।। १६
ते हि केवलमव्यग्राः कुर्वन्तः काममञ्जरीः ।
इष्टानिष्टफलं राम नाभिलेषुर्न तत्यजुः ।। १७
नोदगुः कार्यसंपत्तावाक्रान्ता नास्तमाययुः ।

जहृषुर्न सुखप्राप्तौ मम्लुर्नैव च संकटे ।। १८

मुमुहुर्न विमोहेषु न ममज्जुर्विपत्क्रमैः ।

न जहर्षुः शुभैः शोकै रुरुदुर्न भवानिव ।। १९

प्राकृताचारसंप्राप्ते कुर्वन्तः कर्म केवलम् ।

स्थिता विगतसंरम्भमपरा इव मेरवः ।। २०

तां त्वं दृष्टिमवष्टभ्य राघवाऽघविनाशिनीम् ।

अनहंकृत्यहंकारो विहरस्व यथाक्रमम् ।। २१

यथाभूतामिमामेव पश्यत्सर्गपरम्पराम् ।

मेरुस्थितोऽब्धिगम्भीरः सममास्स्व गतभ्रमः ।। २२

चिन्मात्रं सर्वमेवेदमित्थमाभासतां गतम् ।

नेह सत्यमसत्यं वा क्वचिदस्ति न किंचन ।। २३

महत्तामलमालम्ब्य त्यक्त्वेदमवहेलया ।

असक्तबुद्धिः सर्वत्र भव भव्य भवक्षयी ।। २४

किं रोदिषि घनोद्वेगं मूढवच्चानुशोचसि ।

भ्रमस्युद्भ्रान्तचित्तश्च सौम्यावर्ते तृणं यथा ।। २५

श्रीराम उवाच ।।

अहो न भगवन्नूनं सम्यग्जातमलक्षयः ।

त्वत्प्रसादात्प्रबुद्धोऽस्मि सूर्यसङ्गादिवाम्बुजम् ।। २६

भ्रान्तिरस्तं गता नूनं मिहिका शरदीव मे ।

संशान्ताखिलसंदेहः करिष्ये वचनं तव ।। २७

व्यपगतमदमोहो मानमात्सर्यमुक्त

श्चिरतरमुदितात्मा शान्तशोकश्चिरेण ।

पुनरसुखमगच्छन्स्वच्छयैकान्तबुद्ध्या

यदिह वदसि साधो तत्करिष्येऽविशङ्कं ।।२८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पूर्वार्धे जीवन्मुक्तसंशयनिरूपणं नाम

द्वादशः सर्गः ।।१२।।